# O. P. JINDAL SCHOOL, SAVITRI NAGAR
**Annual Examination (2022 – 2023)**

**Class / Section: IX** **MM: 80**
**Subject: Sanskrit** **Time: 3.00 Hrs.**
Name: ____________ Roll No.:__________

***(Fifteen Minutes Extra will be given for reading the Question Paper.)***
***General Instructions: All questions are compulsory***

निर्देशाः1) प्रश्नपत्रे चत्वारि खण्डानि सन्ति।

| | | |
|---|---|---|
| खण्ड क | पठित अवबोधनम् | (10 अङ्काः) |
| खण्ड ख | रचनात्मकं कार्यम् | (15 अङ्काः) |
| खण्ड ग | अनुप्रयुक्तव्याकरणम् | (25 अङ्काः) |
| खण्ड घ | पठित–अवबोधनम् | (30 अङ्काः) |

2) सर्वे प्रश्नाः अनिवार्याः।
3) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।
4) प्रश्नसंख्या अवश्यं लेखनीया।
5) उत्तराणि संस्कृतेन एव लेखनीयानि।

## (खण्ड–क) पठित अवबोधनम्

**प्र0 1 अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत–**

एकदा शीतस्य भीषणः प्रकोपः अभवत्। सम्राट चन्द्रगुप्तः निश्चितवान् यत्– निर्धनेभ्यः कम्बलानां वितरणं भवेत्। प्रधानमन्त्री चाणक्यः तत्कार्यम् स्वीकृतवान्। भृत्याः सर्वाम् कम्बलानां तस्य कुटीरे स्थापितवन्तः। रात्रौ केचन चौराः कम्बलान् चोरयितुम् तस्य कुटीरम् प्राविशन्। ते अपश्यन् यत्– चाणक्यः एकस्मिन् कटे कम्बलं बिना एव सुप्तः। तस्मिन् एव क्षणे चाणक्यः पदध्वनिम् श्रुत्वा प्रबुद्धः। चौराः तम् अपृच्छन्– "भवतां समीपे कम्बलानां राशिः अस्ति तथापि भवान् कम्बलं बिना एव स्वपिति।" चाणक्यः अवदत्– "श्रृणुतः एते प्रवारकाः केवलं निर्धनेभ्यः वितरणार्थम् एव सन्ति। यदि अहं एतेषु एकं स्वीकरोमि तर्हि अहम् अपि चौरः भविष्यामि। नतमस्तकाः चौराः तस्य पादयोः पतित्वा क्षमायाचनाम् अकुर्वन्

**I एकपदेन उत्तरत –** **(1X2=2)**

i कः निश्चितवान् यत् निर्धनेभ्यः कम्बलानां वितरणं भवेत् ?

ii कम्बल वितरणं कार्यम् कः स्वीकृतवान् ?

**II पूर्णवाक्येन उत्तरत–** **(2X2=4)**

i चौराः चाणक्यम् किं अपृच्छन् ?

ii चाणक्यः चौरम् किं अवदत् ?

**III अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।** **(1X1=1)**

*(इस अनुच्छेद का उचित शीर्षक लिखिए)*

**IV प्रदत्त विकल्पेभ्यः उचितम् उत्तरम् चित्वा लिखत–** **(1X3=3)**

i 'प्रबुद्धः' इति क्रियापदस्य कर्तृपदम् किम् ?

ii 'ध्वनिकेभ्यः' इति पदस्य किं विपर्ययपदमं गद्यांशे प्रयुक्तम् ?

iii 'भीषण प्रकोपः' इति अनयोः विशेष्य पदं किम् ?

## (खण्ड–ख) रचनात्मकं कार्यम्

**प्र0 2** भवती गरिमा। भवत्याः सखी चित्रा गायन–प्रतियोगितायां प्रथमं स्थानं प्राप्तवती। तस्यै लिखिते वर्धापनपत्रे मंजूषातः रिक्तस्थानानि पूरयित्वा पत्रं पुनः उत्तरपुस्तिकायां लिखित–

रायपुरतः
दिनांक ......................

प्रिय (1) .................
सप्रेम नमोनमः।

समाचारपत्रेण ज्ञातम् यत् भवती राष्ट्रिय–गायन–प्रतियोगितायाम् (2) ................ स्थानम् प्राप्तवती, पठित्वा अतीव (3) ....................... अनुभवामि। त्वया बाल्यकालात् एव (4) ....................... गृहीता नित्यम् च (5) ..................... कृतः, इति अहम् जानामि। अनेकाः विपरीत–परिस्थितयः अपि त्वया (6) ...........................। अद्य तव परिश्रमस्य आत्मविश्वासस्य च विजयः अभवत्। सफलतायाः प्रथमं (7) ........................... भवत्या आरूढम्। अस्मिन् अवसरे मम (8) ..................... स्वीकरोतु, भविष्ये अपि एवम् सफला भवेत्, इयं कामना अस्ति। स्वपित्रोः सेवायाम् मम (9) ............................ निवेदयतु।

भवत्याः सखी
(10) ................................

| प्रसन्नताम्, अभ्यासः, सोपानम्, प्रथमम्, गरिमा, चित्रे!, अभिवादनम् सोढाः, संगीतशिक्षा, वर्धापनम्। |
|---|

**प्र03 मंजूषायाम् प्रदत्त शब्दानाम् सहायतया चित्रं दृष्ट्वा पंच वाक्यानि संस्कृतेन लिखत–(1X5=5)**



| बालिका, रोपयति, वृक्षैः, शुद्धम्, रक्षा, रोपणं, कर्तव्यं, भ्राता, जलम्, वातावरणम्, सूर्यः, प्रसन्नः |
|---|

**प्र0 4 अधोलिखितानाम् वाक्यानाम् संस्कृतेन अनुवादः क्रियताम्– (कोई पांच) (1x5=5)**

**क)** भक्त हरि को भजता है।
**ख)** हम नेत्रों से देखते हैं।
**ग)** ज्ञान के बिना जीवन व्यर्थ है।
**घ)** वे सब सत्य बोलेंगे।
**ङ)** हमें पेड़ लगाना चाहिए।
**च)** वह घर से खेत जाता है।

## (खण्ड–ग) अनुप्रयुक्तव्याकरणम्

**प्र0 5 अधोलिखित वाक्येषु स्थूलपदानाम् समुचितं संधि–विच्छेदं वा प्रदत्त विकल्पेभ्यः चित्वा लिखत– (कोई चार) (1X4=4)**

i अधुना **सूर्योदयः** भवति।

(क) सूर्यो + दयः (ख) सूर्य + उदयः

(ग) सूर्य + दयः (घ) सूर्य + ओदयः

ii बालकाः **विद्यालयं** गच्छन्ति।

(क) विद्य + अलयम् (ख) विद्या + अलयम्

(ग) विद्या + अलयम् (घ) विद्याः + आलयाम्

iii तरवः **फल + उद्गमै** नम्राः भवन्ति।

(क) फलुद्गमै (ख) फलोद्गमै

(ग) फलौद्गमैः (घ) फलूद्गमैः

iv **अप्येवम्** आश्चर्यजनकं दृश्यम्।

(क) अपी + एवम् (ख) अपी + ऐवम्

(ग) अपि + एवम् (घ) अप + इवम्

V अथ **वधूत्सवः** मान्यते।

(क) वधु + उत्सवः (ख) वधु + उत्सव

(ग) वधु + उत्सवः (घ) वधू + उत्सवः

**प्र0 6 उचितानि शब्दरूपाणि चित्वा रिक्तस्थानानि पूरयत– (कोई चार) (1x4=4)**

i धनिकः––––– धनम् यच्छति।

(क) निर्धनस्य (ख) निर्धनम्

(ग) निर्धनेन (घ) निर्धनाय

ii एतानि ––––– बालकेभ्यः सन्ति।

(क) वस्तु (ख) वस्तवः

(ग) वस्तू (घ) वस्तूनि

iii पृथिव्यां त्रीणि ––––– सन्ति।

(क) रत्नम् (ख) रत्नानि

(ग) रत्ना (घ) रत्नेन

iv ––––– इह आगच्छ।

(क) हे लता! (ख) हे लते!

(ग) हे लताः! (घ) हे लतयाः

V पर्यावरणस्य रक्षा ––––– परमं कर्तव्यम्।

(क) मह्यम् (ख) मयि

(ग) माम (घ) अस्माकम्

**प्र0 7 उचितानि धातुरूपाणि चित्वा रिक्तस्थानानि पूरयत–(कोई चार) (1X4=4)**

**i** त्वम् किमर्थं रामायणं न ———— ?

(क) अपठत् (ख) अपठः
(ग) अपठाव (घ) अपठतम्

**ii** स्वातिमुनिः संगीतसाधनस्य निर्माणम् ———।

(क) अकुरत (ख) करोत
(ग) अकरोत् (घ) अकुर्वन्

**iii** वयं विद्यालयं गत्वा अध्यापकान् ———।

(क) नंस्यति (ख) नस्यावः
(ग) नंस्यतः (घ) नंस्यामः

**iv** बालिकाः प्रातः काले विद्यालयं —————।

(क) गच्छमः (ख) गच्छसि
(ग) गच्छति (घ) गच्छन्ति

**v** प्रतापः देशभक्तः —————।

(क) आसीत् (ख) आसीः
(ग) आस्ताम् (घ) आसम्

**प्र0 8 अधोलिखितवाक्येषु प्रदत्त विकल्पेभ्यः उचितम् पदम् चित्वा लिखत–(कोई चार) (1X4=4)**

**i** सः नरः ————— काणः अस्ति।

(क) नेत्रम् (ख) नेत्रेण
(ग) नेत्राय (घ) नेत्रस्य

**ii** ——— दक्षिणतः कन्याकुमारी अस्ति।

(क) भारतात् (ख) भारतस्य
(ग) भारतेन (घ) भारतम्

**iii** ————विना नारिकेलवृक्षाः न भवन्ति।

(क) जलस्य (ख) जलानि
(ग) जलम् (घ) जलाय

**iv** माता ———— स्निह्यति।

(क) बालकेषु (ख) बालकानाम्
(ग) बालकैः (घ) बालकाभ्याम्

**v** ———— बहिः नदी बहति।

(क) नगरस्य (ख) नगरेण
(ग) नगरात् (घ) नगरम्

**प्र0 9 प्रदत्त विकल्पेभ्यः उचितानि प्रत्ययायाः उत्तराणि चित्वा लिखत–(कोई चार)** **(1X4=4)**

i माता दूरे स्थित्वा शिशुं पश्यति।

(क) स्था + क्त्वा (ख) स्थि + क्त्वा

(ग) तिष्ठ + क्त्वा (घ) स्थ + कत्वा

ii अन्यमपि वरं हर्तुम् इच्छामि। (प्रत्यय चिनुत)

(क) क्त्वा (ख) ल्यप्

(ग) शतृ (घ) तुमुन्

iii आलस्यम् वि + हा + ल्यप् उद्यमः कुरु।

(क) वीहाय (ख) विहाय

(ग) विहत्वा (घ) विहातुम्

iv सीताम् रामः मिलितवान्।

(क) मिल् + कतवत् (ख) मिल् + क्तवतु

(ग) मिल् + त्वान् (घ) मिल् + तवत्

v चलचित्रं पश्यन् प्रसीदति।

(क) दृश् + शत् (ख) दृश् + क्त्वा

(ग) दृश् + शतृ (घ) दृश् + शन्

**प्र0 10 अधोलिखित वाक्येषु उचित संख्यारूपैः रिक्तस्थानं पूरयत–** **(1X3=3)**

i ————(3) गजाः धावने असमर्थाः सन्ति।

ii ————(4) अजाः चलन्ति।

iii अत्र ——– (1) साधु वसति।

**प्र0 11 निम्नलिखितेषु पदेषु प्रयुक्तान उपसर्गान् लिखत–** **(½X4=2)**

अवकाशः, अधिग्रहणम्, निष्कण्टकः, प्रहारः

## (खण्ड–घ) पठित अवबोधनम्

**प्र0 12 अधोलिखितम् अनुच्छेदम् पठित्वा तद् आधारितान् प्रश्नानाम् उत्तराणि लिखत–**

प्रकृतिः समेषां प्राणिनां संरक्षणाय यतते। इयं सर्वान् पुष्णाति विविधैः प्रकारैः, तर्पयति च सुखसाधनैः। पृथिवी, जलं,वायुः, आकाशश्चास्याः प्रमुखानि तत्त्वानि। तान्येव मिलित्वा पृथक्तया वाऽस्माकं पर्यावरणं रचयन्ति। आव्रियते परितः समन्तात् लोकोऽनेनेति प्र्यावरणम्

**I एक पदेन उत्तरत–** **(½X2=1)**

i का सर्वान् सुखसाधनैः तर्पयति?

ii प्रकृतिः केषाम् संरक्षणाय यतते?

**II पूर्णवाक्येन उत्तरत–** **(1X1=1)**

i प्रकृतेः प्रमुखानि तत्त्वानि कानि सन्ति?

**III उचितम् उत्तरम् चित्वा लिखत–** **(1X3=3)**

i 'पुष्णाति' इति क्रियापदस्य कर्तृपदम् किम् ?

(अ) सर्वान् (ब) इयम्

(स) विविधैः (द) प्रकारैः

ii 'तानि' एव अत्र 'तानि' सर्वनामपदं केभ्यः प्रयुक्मम्?

iii 'धरित्री' इत्यर्थे कि पदं' गद्यांशे प्रयुक्तम?

**प्र0 13 अधोलिखितम् श्लोकम् पठित्वा तद् आधारितानाम् प्रश्नानाम् उत्तराणि लिखत–**

सा तदा करुणा वाचो विलपन्ती सुदुः खिता।
वनस्पतिगतं गृध्रं ददर्शायतलोचना।।

**I एकपदेन उत्तरत–** **(½X2=1)**

i दुःखिता का आसीत्?

ii का विलापं करोति स्म?

**II पूर्णवाक्येन उत्तरत–** **(1X1=1)**

i सीता कम् ददर्श?

**III उचितम् उत्तरम् चित्वा लिखत–** **(1X3=3)**

i 'ददर्श' इति क्रियापदस्य कर्तृपदम् किम्?

ii 'गृध्रं इति' पदस्य विशेषणपदं अस्ति ?

iii 'सुखिता' इत्यस्य विलोमपदं कि?

**प्र0 14 अधोलिखितम् नाट्यांशम् पठित्वा तद् आधारितानाम् प्रश्नानाम् उत्तराणि लिखत–**

**पुरुषः** – भो ! तपस्विन् कथं मामुपरुणत्सि । प्रयत्नेन किं न सिद्धं भवति ? का आवश्यकता शिलानाम् ? सिकताभिरेव सेतुं करिष्यामि स्वसंकल्पदृढतया।

**तपोदत्तः** – आश्चर्यम् ! सिकताभिरेव सेतुं करिष्यसि ? सिकता जलप्रवाहे स्थास्यन्ति किम् ? भवता चिन्तितं न वा ?

**पुरुषः** – (सोत्प्रासम्) चिन्तितं चिन्तितम्। सम्यक् चिन्तितम् नाहं सोपानमार्गैरट्टमधिरोढुं विश्वसिमि। समुत्प्लुत्यैव गन्तुं क्षमोऽस्मि।

**तपोदत्तः** – (सव्यंग्यम्) साधु साधु! आंजनेयमपि अतिक्रामसि !

**पुरुषः** – (सविमर्शम्) कोऽत्र सन्देहः ? किम् च ?

**I एकपदेन उत्तरत–** **(½X2=1)**

i पुरुषः काभिः एव सेतोः निर्माणम् करोति ?

ii केन सर्वम् सिद्धम् भवति ?

**II पूर्णवाक्येन उत्तरत–** **(1X1=1)**

i पुरुषः कस्मिन् न विश्वसिति ?

**III उचितम् उत्तरम् चित्वा लिखत–** **(1X3=3)**

i 'न अहम् सोपानमार्गै...... ' अस्मिन् वाक्ये 'अहम्' इति कर्तृपदस्य क्रियापदम् किम् ?

ii 'अवरोधम् करोषि' इति पदस्य समानार्थकम् पदं किम् ?

iii 'सिकता' शब्दस्य कः अर्थः ?

**प्र0 15 अधोलिखितेषु वाक्येषु रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत–(कोई चार) (1X4=4)**

i वनवृक्षाः निर्विवेकं छिद्यन्ते।

ii गुरुगृहं गत्वैव विद्याभ्यासः करणीयः।

iii श्वेतकेतु वाग्विषये पृच्छति।

iv कुक्कुरः मानुषाणां मित्रम् अस्ति।

v वृत्ततः क्षीणः हतः भवति।

**प्र0 16 निम्नलिखित श्लोकयोः अन्वयं मंजूषातः पूरयत– (½X4=2)**

विना लिप्यक्षरज्ञानं तपोभिरेव केवलम्।

यदि विद्या वशे स्युस्ते, सेतुरेष तथा मम।।

**अन्वय** यदि लिपि (1) .............................. विना केवलम् (2) ........................ एव ते वशे विद्या (3) .................... तथा मम (4) ........................ सेतुः।

जटायोः पश्य मामार्य ह्रियमाणामनाधवत्।

अनेन राक्षसेन्द्रेणाकरुणं पापकर्मणा।। **(½X4=2)**

**अन्वयः –** आर्य ———! अनेन———— राक्षसेन्द्रेणा ———— अनाथवत् ह्रियमाणाम्——— पश्य।

| अकरुणम्, माम्, एषः, स्युः, जटायो ! पापकर्मणा, तपोभिः, अक्षरज्ञानम् |
|---|

**प्र0 17 अधोलिखितानि वाक्यानि कथाक्रमेण संयोज्य लिखत– (½X8=4)**

(निम्नलिखित घटनाक्रम को उचित क्रमानुसार पुनः लिखिए।)

**i)** सा सखीभिः सह तीर्थयात्रायै काशिविश्रवनाथमन्दिरं प्रति गच्छति।

**ii)** उभौ नन्दिन्याः सर्वविधपरिचर्या कुरुतः।

**iii)** उमा मासान्ते उत्सवार्थ दुग्धस्य आवश्यकताविषये चन्दनं सूचयति।

**iv)** मल्लिका पूजार्थ मोदकानि रचयति।

**v)** उत्सवदिने यदा दोग्धुं प्रयत्नं करोति तदा नन्दिनी पादेन प्रहरति।

**vi)** कार्याणि समये करणीयानि इति चन्दनः ननिदन्याः पादप्रहारेण अवगच्छति।

**vii)** चन्दनः उत्सवसमये अधिकं दुग्धं प्राप्तुं मासपर्यन्तं दोहने न करोति।

**viii)** चन्दनस्य पत्नी तीर्थयात्राः समाप्य गृहं प्रत्यागच्छति।

**प्र0 18 अधोलिखितपदेषु पर्यायः पदेन सह मेलनम् कुरुत– (1X3=3)**

| | |
|---|---|
| श्रेष्ठम् | खगाः |
| पक्षिणः | वैदुष्यम् |
| पाण्डित्यम् | वरम् |

——00——

प्र0 15 अधोलिखितेषु वाक्येषु रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत–(कोई चार) (1X4=4)

i वनवृक्षाः निर्विवेकं छिद्यन्ते।

ii गुरुगृहं गत्वैव विद्याभ्यासः करणीयः।

iii श्वेतकेतु वाग्विषये पृच्छति।

iv कुक्कुरः मानुषाणां मित्रम् अस्ति।

v वृत्ततः क्षीणः हतः भवति।

प्र0 16 निम्नलिखित श्लोकयोः अन्वयं मंजूषातः पूरयत– (½X4=2)

विना लिप्यक्षरज्ञानं तपोभिरेव केवलम्।

यदि विद्या वशे स्युस्ते, सेतुरेष तथा मम।।

अन्वय यदि लिपि (1) .............................. विना केवलम् (2) ........................ एव ते वशे विद्या (3) .................... तथा मम (4) ........................ सेतुः।

जटायोः पश्य मामार्य ह्रियमाणामनाधवत्।

अनेन राक्षसेन्द्रेणाकरुणं पापकर्मणा।। (½X4=2)

अन्वयः – आर्य ———–! अनेन———– राक्षसेन्द्रेणा ———— अनाथवत् ह्रियमाणाम्——— पश्य।

| |
|---|
| अकरुणम्, माम्, एषः, स्युः, जटायो ! पापकर्मणा, तपोभिः, अक्षरज्ञानम् |

प्र0 17 अधोलिखितानि वाक्यानि कथाक्रमेण संयोज्य लिखत– (½X8=4)

(निम्नलिखित घटनाक्रम को उचित क्रमानुसार पुनः लिखिए।)

i) सा सखीभिः सह तीर्थयात्रायै काशिविश्रवनाथमन्दिरं प्रति गच्छति।

ii) उभौ नन्दिन्याः सर्वविधपरिचर्या कुरुतः।

iii) उमा मासान्ते उत्सवार्थ दुग्धस्य आवश्यकताविषये चन्दनं सूचयति।

iv) मल्लिका पूजार्थ मोदकानि रचयति।

v) उत्सवदिने यदा दोग्धुं प्रयत्नं करोति तदा नन्दिनी पादेन प्रहरति।

vi) कार्याणि समये करणीयानि इति चन्दनः ननिदन्याः पादप्रहारेण अवगच्छति।

vii) चन्दनः उत्सवसमये अधिकं दुग्धं प्राप्तुं मासपर्यन्तं दोहने न करोति।

viii) चन्दनस्य पत्नी तीर्थयात्राः समाप्य गृहं प्रत्यागच्छति।

प्र0 18 अधोलिखितपदेषु पर्यायः पदेन सह मेलनम् कुरुत– (1X3=3)

| | |
|---|---|
| श्रेष्ठम् | खगाः |
| पक्षिणः | वैदुष्यम् |
| पाण्डित्यम् | वरम् |

——00——



14/02/2023